रहल्लिमधुपर्कवूअवश्यवेंतवर्णिसल्पट्टधेएवंचमंत्रहूयपर्यालोचनेयिंदऋत्विक्सामान्यक्के मधु
पर्कीभावहल्लिदोषप्रतिपादनादिंदलूवरणमात्रदल्लिमधुपर्कावश्यकवेंतकूकाणुलधेप्रस्तू
तहमाद्रौपाग्नौक्रियमाणेनःसंपूर्णमधुपर्केणऋत्विनःकर्मकारयेत्। अपूर्णकारयेत्कर्मकिंत्विषे
णेवयुज्यतइति। एवंचप्रकृतदल्लिऋत्विगादीनामंतरांशौ-चमागेयाज्ञवल्क्यः। ऋत्विगादीक्षि

श्रीमद्व्यजनादिषट्कुलनिष्ठराज
मान्यराजेश्रीनिडगोडशंभुरायेः

ह्येयंआरंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोःनांदीमुखविवाहादौश्राद्धे
पाकपरिक्रिया॥यज्ञइतितत्संनिमधुपर्केइयंनान्यथेतिनांदीमुखवास्तु
कृवरणाङ्गमधुपर्कोतुनघंयाःस्यात्ननदाविवाहइतिस्मृतिदर्पणे॥म
धुपर्कस्यकर्मणिकर्मणांतंतबोधायनसत्रदक्षिणोरुवदरिंदकर्मा
वर्णरहितरादराजादिगोरागेचाचार्यायचयंबआश्वलायनस्त्र
दिंदकेवलहजांवेतहविद्याध्यवुंदु ५आधानेष्टिपशुबंधादातद्
भावेऽन्येप्रवंतीतिसिध्यमित्यनेनआधानादौमधुपर्कंकरणफला
निशाःसतंकभावश्चतदकरणेनदुषयोर्भावोन्यनिशश्चेतिमधु
पर्कस्यसतंकतिप्रतोभावत्यंदा[illegible]तंगर्भाधानादिषुतुस्वयंनेव
धुपर्कंकुर्यात्स्वस्कंधारोहणवदशक्त्यवादन्यस्यकर्तुरभावात्सत
कंप्राप्तिहेतुर्नातत्करणमेवनसंभवतीत्यतःकुतःसतंकप्रश्नऽवत
रनिव्रतवत्तेयादिनायज्ञशब्दःपाकयज्ञःब्रह्मयज्ञध्यानयज्ञादीश्रा
द्धेषिसन्नपाकयज्ञानांस्वोपासनाग्नेःस्वस्यकर्तृत्वेनध्यानजपादा
वपिमधुपर्कोस्तिनेत्रऽनुपदोक्तोत्तरमेवेतिऽलंबहुना ६रुवि
वाहमध्येऽशौचंप्राप्तंनेकथमित्यत्रांगीकृतायांआरब्धयज्ञ
नःत्रिरात्रंद्वादशरात्रंसंवत्सरंवाऽऽश्वलायनप्रयोगपरिजातेच
अयंप्रकृतिचतुर्थपर्यंतंविवाहव्रतंचरिष्यामेऽव्रतयज्ञविवा
हेषुश्राद्धेहोमार्चनेजपेःप्रारब्धेसतंकंनस्यात्नांदीमुखविवाहादौत
[illegible]धुपर्केऽ[illegible]ग्न्यधानादित्यादिवचनंदेवैःअवश्यंतत्स्नान
पर्यंतंऽशौचाभावःवैश्वदेवाद्यारंभस्यान्यकर्मत्वात्तत्रनिवृ
त्याभावः ७॥श्रवणादौव्रतिवर्षेष्वपिमधुपर्कवरणपुरःसरंप्रार
भेसत्येवाशौचानंगमःभाविनहिसतंकदर्शनेन ८॥श्रुत्विजोय
जमानस्यतथाध्यापकस्यचाचार्यस्यचवच॥यावत्स्नपनमादृंतावच्छुध्यानसं
श्रवइतिस्मृतिसारसमुच्चयोद्धृतशाट्यायनिवचनेनतत्कर्मसमा
प्तिपर्यंतंयजमानस्याशौचइतियज्ञेचतुर्णांवरणपक्षेऽवश्यंआ
गमेनाध्यापकस्यायमर्थःआश्वलादिचतुर्गणदक्षिणोऽशक्तऋत्विजरिदंमु
ख्यकल्पेछंदः४ऋत्विजरीगेमात्रंमधुपर्कंवृणमाऽइतररीगेमाऽदयेऽ
दक्षिसमावेशमाऽदरेमधुपर्कंवृजनत्यतिरिक्तऋत्विजरागेऽशौ
चमात्रंवादरेइतरऽऋत्यलदक्षिइउनेकेंबवचनादिंदमधुपर्कोत्तर
आशौचाभावेनेऽआगुच्यचे ९॥श्रोतेकर्मणितत्कालंस्नातःशुचि
मवासुयात्॥यागातिरिक्तेश्रौतेस्मार्तेचयंबइवुरनित्याग्निहोत्रऽअ
पासनगऽकाम्येसतिकमात्रवादरेत्यागेयजमानमात्रपरइतरकृत्य
ऋत्विक्करेंबवऽर्थे १०॥नवरात्रीव्रतविधिवक्ष्यंतेप्रातर्नित्यक्रिय
कृत्वाऽऋत्विजांवरणंतथा॥अर्घ्यपाद्यादिकंसर्वंकृत्वेयंमधुपर्व
कं॥मधुनामधुपर्कोयंतनोरुवदरिंदइतिक्रमेणोक्तव्रतयज्ञविवाहेषु
ऋत्विजोमधुपर्कोत्तरमित्यादिवचनादिंदमधुपर्कंपृथक्करवर

णमाडिकोंडरेस्तत्र बरालेकारणतोरुवदिछा उनेकाहंवहूतंकायेन
नुष्ठीयमानं॥देवार्चनंजापंइतिषडशीतौ काम्यापवासेप्रश्न...तेत्तंतरास्र
तस्तत्र॥तत्रकाम्यव्रतंकुर्याद्दानार्चनविधोजनइत्यादिवचनगळमधु
पर्करहितस्यव्रतानाप्राविसवेरे॥जननेमरणेचैवनिष्ठाशोचनविधौ
यश्चेपिवारद...तेचदेवयागनथैवच॥यंबुवदकस्मत्कृतइतरअनेव
स्थळगळ...तृतीयप्रश्न...छिनोसिरुवणहरिअदरिंदत्तसमाधा
यागवहुदु॥...जपपारायणंयेनुकुंतेनुरा...स्सवे॥...नकंम...वा
पितेषांस्यदनिश्चयः॥इतिगारुड...तथापर...यज्ञेवाप्युत्सवेवापि
दीक्षाहूर्वोयतोवधिः...इतरेषांनदो...स्तिस्थानत्यागपरोभवेत्तिहो
गेहरुपरिंदमधुपर्करहित...जपपारायणादिकृतंगळीगेस्तत्रकुंदेहेळि
हदरपछिमपक्षमा...कोतुकबंध...नंतरकोतुकबं...येवतन्म
ध्येस्...भवेत्॥मातापितरित्यागादन्यस्यतुना...ध्यते॥दी...स्वपि
वसपैक्यमात्रान्...मनंग...शार्यामरणनिकोमिनादीक्षासकृत्
ध्यतीते॥लो...दीक्षांकुर्वास्तनिकृ...विधिंत्यजा...दृढ...॥न
रकंप्रयातन्ननंयापरं...इनारकं॥इत्यादिस्मा...वचनगळिंदरं...विघ्न
बंतदोळ...रेष्ट...वचनपरिसा...माडि...वचनसं...हदिंदत्तस्य
ष्टयागसंधे॥...बहु...नवा...भारता...स्व...दछिकार...य
मा...वेकुहेवमे...यंबध्यमा...फलं...उत्तरइ...त्तथेमधु...शब्द
र्थवमधु...सर्पिषा...पसकं...॥मधुपर्कविधिपो
क्तोयज्ञेस्वपिचयतेयंब...गपरिजा...वच...नदधिनिम...वा
नो...येवज...लायनया...दिंदत्तमधुसंपृक्तदधियज्ञाङ्ग
कथा...देवतेगळीगेराजादिगळगेऋत्विजरीगअर्पिसुवदेमधुपर्केश
ब्दार्थवो॥१६॥बंदुकर्मरछिविं...पर्वकनियोगा...दवन्नुताद्दशविधि
वहूर्णउ...कर्मरछिकोशाद...दाछहोगिमाडुकुडुवागि...नाकर्मणिक
र्मानरदारंभःयंबन्यायदिंद...कोशा...धनचनजेदयंबविरुद्धश्वरप
क्षतीयवाक्यदिंदत्तसिद्धवायुत्त...कर्मयाचरयेंतुगळिंदरस्नानादि
नित्यकर्मगळछिंदप्रतिबंधकुं...धीत्॥...॥१८॥प्रश्नगळीगे१५
१२ईरडुप्रश्नेगळिंदत्तसमाधानवागबहुदु आदरकर्मम...दाछहरि
कुवाहुंदरंदर्म...नाशवादोलयंतादोरदुकेहरिकथावेद...स्त्र
पुराणहरिस्मरणा...गळिंदपूर्वकर्मअतिशयफलवेंदु॥कडोपनिषदि॥म
यतःश्रा...कालेतरनंत्या...ल्पतरंनि मार्कंडेय...राणे शांति...र्माणि
सर्वत्रतथादुस्वप्नदर्शने॥मदनुडारुचाम्यासकमा...त्यंश्रद्...न्मम॥
तथा॥...४॥ वायुक्तथेयंतात्रीमद्भागवतषष्ठस्कंधदाछ एतत्सर्वं
नश्युत्...चकर्मण्यनं...तृप्तिःपितृदेवतानां॥तथा॥अश्वमे॥क्रतुमा
णेकर्मणादेवेन...चमानु॥यत्रयत्रानुकू...ततत्तेषांल...कृतंदु
आत्मानमेतत्परमंपवित्रंसकृद्विदद्योच्यं॥अनाथप्रयुक्तपि
तृदानिमा...निस्संस्कृपाठा...र्मवंच॥...यु...अस्मिन्कर्मण्यना
दासेथत्रात्मनाम...त्र॥आपा...वानगोवंदपादपद्मासवंमधु

इत्यादिगळिंदसद्दीकर्मबंदे अनिशयफलमक्कुं हरिकथेयइल्लस्थ
लदल्लिहेळल्पट्टुदादुदुं पूर्वकर्मबंधनक्कुं बाधिसुवनेबुपदुक्कुसन्तु लीवे
क्कु॥१७॥ स्त्रीजराजादिगळ गेतन्तत्कार्यपुसन्निवृत्तियं त्रिंशश्लोकी
वचनदोळ्निर्णयिसि विनाल्लि अर्थमा वाग्नसंविग्रिगेमधु
र्कोत्तरदा राजनीगेराज स्यदाल्लि व्रतादिगळल्लिसंकल्पाविवाह
दल्लिनारद ध्रुवहरिं श्रवणादिनाशोचं- यंबुवदरिंद नदितरप्र
तिबंधकाभावदिं हरिकथाश्रवणकनिषेधयावगं कारणवर्य
दे मत्स्य प्रमादादा बेतांकर्मप्रत्यवायाध्यरपुवत्॥ स्मरणादेवतद्वि
ष्णोः संपूर्णस्यादिनिश्कल्मषं यंबुदरिंदसमाधानवागुत्तु॥
शरमध्येस्थितंतोयंयंबुवदक्कुकथिकवाचकमानात्कृतसहस्र
येंबुदरिंविधब्रह्महत्यादोषंतोयदिंदब्रह्महत्यासमानपातक
नाशनदमानसिक्रब्रह्महत्यापरिहारपरनादिपुराणदिं
दवागियब्रह्महत्यापरिहारशास्त्रदिं प्रायश्चित्तदिंदकाविक्रब्रह्म
हत्यनिवृ वंतादुरुवदरिं प्रायश्चित्तखंडनेयायुपलक्ष॥२१
श्रीमद्व नतदेतेश्रीमद्भागवतश्रीमद्भा वणकेवलहरि
अष्टादश पुराणश्रवणविधिगळुभारतधर्मास्त्रं कर्मविपाकमहा
र्णवब्रह्मविवर्तहरिवंशगरुडाख्यविधिशा मद्दाणबकर्मविपाकसारब्रा
कमलाकरिदुगावपास्करिदुगरुडाख्यकेवलहरिवंशाख्यविधियं
दत्तेरिया एवमन्यपुराणेषुउपरिश्रवणविधिईयवंतश्रीश
कराचार्यरुउत्तरमीमांसाशास्त्रदाद रत्नेनमातरिश्वाख्यार
यंबुअब्धिवरुणदा आतं शमाडिदंनईश्व विध्वेसर्वत्र
हरणमाडेबुगानिअतिदुर्मादिरुवदरिं पुराणग शश्रवणवि
धिइल्लं तेहेळल वेळवदिल्ला २२॥ ॥ म प्राकृप्रमा
संवत्सरदचैत्रशु ३ बृहस्पतिवासरश्चरणमध्यस्तंभबंदप
विषयदल्लिनम्मपत्र कृनानुवे॥ होसमनेगणेशान गलूरुडु
आनंदोपाध्यिवरदपत्र ईगआयरवरदपत्रसहपूर्वोत्तरविरोधरूप
स्तोविद नम्ममठ बहालवाग्यनम्मानुविवादशरीरदाहु आल
स्वधा लंम्मधर्मदघरालनाडुवारि लिक्कोनेळबयोधितेंतवेसराग
बारदु॥ प्राइज्ञानाक्षिमध्येलेरवनेन॥ श्रीमद्भारतश्रवणमस्तु॥ श्री







॥ इति मालविकाग्निमित्रं समाप्तम् ॥

परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणविहङ्गाधरस्व
रस्वतिना विरचितायां ज्ञानदीपिकायां पञ्चमोऽध्यायः ॥ ५ ॥

इयं ज्ञानदीपिका तत्त्वविवेचकमुद्रणयंत्रालये मुद्रिता
शकाब्दाः १८१३.

सर्वानाक्रम्य तस्थिवान् ॥ ४७ ॥ अधीत्य सर्वशास्त्राणि वेदान्तादीनि कृत्स्नशः ॥ ज्ञानिनां प्रवरो भूत्वा वभासे तपसा त्विषा ॥ ४८ ॥ सर्वज्ञेन्द्रसरस्वतीगुणगणप्रत्युज्ज्वलनंतुना काश्यां विन्ध्यगिरावन्तिनगरे गोकर्णसौधे पुरे ॥ मुक्तैर्मौक्तिकहेमरत्नसदृशैर्वर्द्धां च ये मालिकां कंठे बिभ्रति साधवो यतिवरास्ते यान्ति विष्णोःपदम् ॥४९॥ पूर्वं मस्करिणामनन्यमनसां ज्ञानाय यान् बोधितान् काश्यां शङ्करभास्करादवगतान् सत्संप्रदायाश्रमान्॥ प्रोचे संततिमात्मनो यतिवरो गङ्गाधरेन्द्रो महान् तान्येभ्यो निजगाद सन्ततिम-

सौ तेभ्यो यतिभ्यो नमः ॥ ५० ॥ शृण्वन्ति गायन्ति पठन्ति सन्तः खेलन्ति मोदन्ति नमन्ति चेमाम् ॥ ये ज्ञानदीपां गुरुराजसंततिं ते यान्ति सर्वे पदमच्युतस्य ॥ ५१ ॥ य इमं पठते नित्यं सर्वान्कामानवाप्नुयात् ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ ५२ ॥ पुत्रार्थी लभते पुत्रान् मोक्षार्थी मोक्षमाप्नुयात् ॥ कन्यार्थी लभते कन्यां स चिरं मोदते क्षितौ॥ इत्येतद्गुरुमाहात्म्यं श्रूयते पठ्यते कलौ ॥५३॥ कलिदोषैर्न बाध्येत प्रेत्य स्वर्गे महीयते ॥ भुक्त्वा भोगाननेकांश्च मृतःस्वर्गमवाप्नुयात् ॥ ५४ ॥ इति श्रीम-

दायं च मन्त्रनिम् ॥ शिष्यान्प्राशिष्यांस्तच्छिष्यान् जगाद ग्रन्थतो यतिः ॥४२॥ संप्रदायाश्रमाचारविद्याज्ञानतपोबलैः॥ ज्येष्ठो बभूव सर्वेषां गङ्गाधरसरस्वती ॥ ४३ ॥ तेनोक्तां मूलतोज्ञानदीपिकामपवर्गदाम् ॥ तामेव कथितां प्राज्ञा गुरोः प्राप्तां परंपराम् ॥ ४४ ॥ आकर्ण्य हृदयं कृत्वा प्रणम्य गुरुमात्मिकम् ॥ आज्ञां गृहीत्वा निर्याताः स्वाश्रमान्प्रति-पत्तिरे ॥४५॥ शिष्यानाश्वास्य सर्वज्ञैर्गुरुमूलकथामृतैः ॥ स्व-स्याश्रमपदं गत्वा सर्वज्ञेन्द्रसरस्वती ॥ ४६ ॥ ब्रह्मसायुज्यं साम्राज्यं लेभे कालवशाच्चिरम् ॥ तच्छिष्यो रामचन्द्राख्यो

चेत्संशयोस्माकं पुनस्त्वं छेत्तुमर्हसि ॥ इत्युक्त्वा ते प्रशांसन्तो निषेयुर्गुरुमात्मनः ॥ ३७ ॥ सर्वज्ञ उवाच ॥ अविमुक्ते पुरा शिष्या यतयो ब्रह्मवादिनः ॥ नानादेशात्समागत्य मिलित्वा सधिनोऽभवन् ॥ ३८ ॥ वयं श्रेष्ठा वयं श्रेष्ठाः संप्रदायप्रवर्त्तिनः ॥ एवमन्योन्यसंवादः प्रत्यहं समपद्यत ॥ ३९ ॥ एकत्र मिलिताः सर्वे तीर्थस्नानमसङ्गतः ॥ महान्तो योगिनो निष्ठा विद्वांसो वीतकल्मषाः ॥ ४० ॥ निश्चित्य प्रोचिरे स्वं स्वं संप्रदायं पृथक् पृथक् ॥ भास्करेन्द्रमरुत्त्वत्या मूलभूताद्यतीश्वरान् ॥ ४१ ॥ निश्चलाचेन्द्रपर्यन्तं संप्र-

न्शिष्यवर्गैश्च मानयन्न शिक्षयन्नपि ॥ पण्डितैर्धर्मशास्त्रज्ञैः
कविभिर्वेदपाठकैः ॥ २१ ॥ पुराणवक्तृभिर्वैद्यैश्चारयाचकमे-
वकैः ॥ वाह्यैर्भृत्यजनैरन्यैर्नानादेशसमागतैः ॥ २२ ॥
पंग्वंधबधिरस्तब्धसरोगार्तार्थदुःखिभिः ॥ शिष्येण नंदिना
मार्गं यतिधर्मस्य धीमता ॥ २३ ॥ पठता सर्वशास्त्राणि
कार्याकार्यं विचिन्वता ॥ पुरोहितार्चकाग्र्यां च गणकैश्च
विचारिभिः ॥ २४ ॥ एतैःसमन्वितो ज्ञानी वभासे हरिसे-
वया ॥ तदन्वये समुत्पन्नः प्रत्यग्ब्रह्मसरस्वती ॥ २५ ॥
चकार गुरुवन्मौनीमुपायेवेदमङ्क्ष्वेकः ॥ पूर्वभूताश्च यतयो

यथा चेरुस्तथाधुना ॥ २६ ॥ विधाय वर्णिनं शिष्यं संन्यासेन च कर्मणा ॥ सोऽपि सिद्धिं परां लेभे विश्वनाथसरस्वती ॥ २७ ॥ मुमुक्षवो गताः सिद्धिं यतयो ज्ञानिनोऽमलाः ॥ वेदान्तमार्गनिपुणाः पूर्वमासन्न यतीश्वराः ॥ २८ ॥ संप्रदाये सरस्वत्याः शाल्मलीतीरवासिनः ॥ त्रिंशत्मतातिरिक्ता ह्यासीत्सन्ततिःग्रथिता भुवि ॥ २९ ॥ तत्कुलाजात्समुद्भूतो गङ्गाधरयतीश्वरः ॥ सर्वानाकृत्य बुद्ध्यास्ते तद्गुणाधिगुणोऽभवत् ॥ ३० ॥ पदवाक्यप्रमाणज्ञः समदृष्टिः प्रकाशते ॥ आसेतुहिमवच्छैलं कीर्तिस्तेन वितन्यते ॥ ३१ ॥ ॥ ३१ ॥

एतादृशः पुरा नासीत्संभविष्यति नो पुरः ॥ तस्मात्तं मनसा वाचा कायेनाहं नमेऽन्वहम् ॥ ३२ ॥ प्रकाशस्तारकब्रह्म स्वप्रकाशसरस्वतेः ॥ बृहद्गङ्गाधरयतेर्वादः काश्यामभूत्किल ॥ ३३ ॥ स्वाराज्यसिद्धिनामानं ग्रन्थं चक्रे जिगीषया ॥ ग्रन्थेन तेन भग्नोऽभूत्स्वप्रकाशो यतीश्वरः ॥ ३४ ॥ एतद्ज्ञातं जगत्सर्वं विद्यात्यागतपोबलैः ॥ सर्वज्ञ उवाच ॥ इत्येते गुरवोऽस्माकं पृच्छतां वोऽन्ववादिषं ॥ ३५ ॥ इत्याकर्ण्य वचस्तस्य सर्वज्ञेन्द्रसरस्वतेः ॥ ॥ शिष्या ऊचुः ॥ धन्याःस्मः कृतकृत्याःस्मः सर्वज्ञेन्द्रसरस्वते ॥ ३६ ॥ यदि

॥ अथ श्रीमद्देवीभागवतम् ॥

॥ श्रीगणेशायनमः ॥ वन्दे कुन्देन्दुधवलमिन्दिरापति-
वन्दितम् ॥ भुजङ्गभूषणं भद्रं चन्द्रचूडमुमापतिम् ॥ १ ॥
गुरुं गजाननं शंभुं ब्रह्माणं बटुकं हरिम् ॥ दुर्गां सरस्वतीं
लक्ष्मीं विद्यां वन्दे समृद्धये ॥ २ ॥ शिष्या ऊचुः । स्वामि-
न्सर्वज्ञ देशेषु ख्यातिं गत्वा सुविस्तराम् ॥ अपवर्गं
गतास्तेषां मूलं वक्तुं त्वमर्हसि ॥ ३ ॥ सर्वज्ञ उवाच ।
युष्माकं ज्ञानिनां शिष्या द्वैताद्वैतविवेकिनाम् ॥ कुतूहलेन
यत्पृष्टं तच्छृणुध्वं वदामहे ॥ ४ ॥ अहिच्छत्रं पुरा ख्यातं
ब्रह्ममण्डलमण्डितम् ॥ तेषां मध्ये गुणनिधिर्बभूव विदुषां

वरः ॥ ५ ॥ तस्य विश्वपतिः पुत्रश्चतुस्तन्त्रविशारदः ॥ सरस्वत्यां च भार्यायामभवद् ब्रह्मशापतः ॥ ६ ॥ तस्य प्रवर्तमानस्य कदाचिद्दशहायनः ॥ विद्यापारं गतो दुःखी चिन्तयामास कारणम् ॥ ७ ॥ किं धनेन किमन्येन पशु-भृत्यादिसम्पदा ॥ गृहेण गृहिणीपुत्रैर्व्यर्थं स्यात्सकलं हि तत् ॥ ८ ॥ इत्येवं चिंतयानः सन् निर्विण्णः स्तब्धमानसः ॥ ययौ गोकर्णममरैः सेवितं क्षेत्रमुत्तमम् ॥ ९ ॥ तपस्तप्स्ये चिरं तत्र महाबलसमीपतः ॥ एवं मनसि निश्चित्य तस्थौ वारिनिधेस्तटे ॥ १० ॥ प्रातरुत्थाय विधिवत्कोटितीर्थजले ॥ १ ॥

बटुः ॥ निर्वृत्य पैतृकं कर्म पुनःस्नात्वैव चाह्निकम् ॥ ११ ॥ चकार मनसा सर्वं ज्ञानी मौनी च सर्वदा ॥ तत आगत्य देवेशं महाबलमतन्द्रितः ॥ १२ ॥ चकार महतीं पूजां ब्राह्मणैर्वेदपारगैः ॥ मात्रा तस्मै पुरा दत्तं रत्नद्वयमनुत्तमम् ॥ १३ ॥ सुवर्णप्रदमित्येकं क्षुत्तृषोर्नाशकं परम् ॥ तेन दत्तेन स्वर्णेन सर्वं च कुरुते स्म सः ॥ १४ ॥ निर्माय महतीं शालां मध्याह्ने बहुविस्तराम् ॥ सर्वान् द्विजान् समाहूय वेदशास्त्रार्थपारगान् ॥ १५ ॥ भोजयामास चान्नेन पाय-सापूपषड्रसैः ॥ दधिमध्वाज्यक्षीरौघैस्तृप्ता विप्राः सहस्रशः

॥ १६ ॥ दक्षिणाभिः सताम्बूलैर्दत्त्वा सर्वान् व्यसर्जयत् ॥ ततः प्रदोषवेलायां सन्ध्याकर्म समाप्य वै ॥ १७ ॥ महाबलं प्रणम्याथ दृष्ट्वा स्तुत्वा मुमोद ह ॥ नर्तनैर्गायनैः स्तोत्रैरुपचारैरनेकशः ॥ १८ ॥ सन्तोष्य परमात्मानमम्बामपि गणाधिपम् ॥.ततः क्षेत्रप्रसङ्गेन सुष्वाप सुखतः शुचिः ॥ १९ ॥ प्रातरुत्थाय सुस्नात्वा यात्रार्थं ब्राह्मणैः सह ॥ ब्रह्माद्या देवताः सर्वाः पृथक्सम्पूज्य भक्तितः ॥ २० ॥ पुनरागत्य सदनं वैश्वदेवादिकाः क्रियाः ॥ कृत्वा तु भोजयामास दशसाहस्रसंख्यकान् ॥ २१ ॥ यथोक्तं कल्पया- ॥ २ ॥

मास एवं दिनचतुष्टयम् ॥ ततः स्वस्थमना भूत्वा नन्दते स्म यथा सुरः ॥ २२ ॥ एतादृशं बटुं दृष्ट्वा मेनिरे जनसंसदः ॥ अयं सुरो वा गन्धर्वः कल्पद्रुरिह चागतः ॥ २३ ॥ एवमन्योन्यमाभाष्य हृष्टचित्ता बभूविरे ॥ तत्पूजकान् समाहूय स्वर्णसाहस्रमाददौ ॥ २४ ॥ तत उत्थाय देवेशं प्रार्थयित्वा महाबलम् ॥ देवैरपि सुदुष्प्रापं प्रसादमगमत्तदा ॥ २५ ॥ तत्प्रेरितेन मार्गेण ययौ रामेशपर्वतम् ॥ जटातीर्थसमीपे तु गुहासीद्बहुसुन्दरा ॥ २६ ॥ तदृष्ट्वा गह्वरवरं प्रविवेश महामतिः ॥ पूर्वं सुरासुरा यस्यां सिद्धिं प्राप्य दिवं गताः

॥ २७ ॥ यतात्मा नियताहारश्चचार तप उत्तमम् ॥ एवं गतेषु कालेषु तपसाराधयन् हरम् ॥ २८ ॥ तपसातेन तुष्टः सन् पार्वत्या सह शङ्करः ॥ आविर्बभूव सहसा वरदः पार्वतीपतिः ॥ २९ ॥ वर्णिन् किमर्थं तपसि स्थितोऽसि वद तत्त्वतः ॥ वरदोऽस्मि त्वयिप्रीत्या वरं वरय सुव्रत ॥ ३० ॥ इत्युक्तस्तेन देवेन प्रहसन् वाक्यमब्रवीत् ॥ धन्योऽस्मि कृतकृत्योऽस्मि दर्शनाद्गिरिजापते ॥ ३१ ॥ कृपैका तिष्ठतु मयि अन्यं नेच्छामि नश्वरम् ॥ मोक्षसाम्राज्यपदवीं कांक्षितामृषिसत्तमैः ॥ ३२ ॥ सर्वज्ञत्वमिहाकांक्षे वेत्सि त्वं मे मनोरथम् ॥ इत्याकर्ण्य वृषारूढः प्राह विप्रं महाबलः ॥ ३३ ॥ यत्ते मनसि तत्सर्वं मत्प्रसादादवाप्स्यसि ॥ ततो लब्धवरः सोऽपि साष्टाङ्गं प्रणिपत्य च ॥ ३४ ॥ उत्थाय प्राञ्जलिर्भूयस्तुष्टाव गिरिजापतिम् ॥ आगमैर्निगमैः सूक्तैर्नानावर्णविशोभितैः ॥ ३५ ॥ नमो नमस्ते शशिखण्डमौले नमो नमस्ते गिरिजासहाय ॥ नमो नमस्ते भुजगाङ्गदाय नमो नमस्ते सुरवल्लभाय ॥ ३६ ॥ इति स्तुत्वा महादेवं श्रद्धया विनयान्वितः ॥ विलोकयन् दुराधर्षं तस्थौ तूष्णीं च सम्मुखम् ॥ ३७ ॥ सुप्रसन्नो महादेवः पुनराहार्भकं मुनिम् ॥

इतो वाराणसीं गच्छ तत्र सिद्धिमवाप्स्यसि ॥ ३८ ॥ तच्छ्रुत्वाथ मुनिश्रेष्ठः प्रयाणायोपचक्रमे ॥ बटुशङ्करसंवादं ॥ ४ ॥ ये शृण्वन्ति समाहिताः ॥ ३९ ॥ ते प्राप्य निधनं सर्वे गच्छन्ति मोक्षमन्दिरम् ॥ वक्तॄणामपि विश्वासाच्छाश्वतं पदमव्ययम् ॥ ४० ॥ इति श्रीज्ञानदीपिकायां गुरुशिष्यसंवादे प्रथमोऽध्यायः ॥ १ ॥

इति श्रुत्वा पुरावृत्तं सर्वज्ञाद्यतिसत्तमात् ॥ शिष्या विज्ञापयामासुस्तत्कुतूहलविस्तरम् ॥ १ ॥ शिष्या ऊचुः । यतिराज महाप्राज्ञ कथं वाराणसीं गतः ॥ कथं संन्यस्तवान्विप्रः ॥ ४ ॥

सम्प्रदायश्च कश्चन ॥ २ ॥ पट्टबन्धः कथं स्वामिन् चन्द्रमौलिरभूद्वशः ॥ नरसिंहसरस्वत्योः प्राप्तिं ब्रूहि यथार्थतः ॥ ३ ॥ एतत्सर्वं श्रोतुकामा वयं स्थास्यामहे गुरो ॥ गुरुरुवाच । कृतप्रयाणः स मुनिः प्रययौ गौतमीतटम् ॥ तत्र स्नात्वा च दत्त्वा च भुक्त्वा द्विजवरैः सह ॥ ४ ॥ भरद्वाजाश्रमं तस्माद्गङ्गातीरे मनोहरे ॥ उषित्वा ऋषिभिः सार्धं दिनत्रयमुदारधीः ॥५॥ प्रयागाख्यं क्षेत्रराजं ऋषेराज्ञापुरस्कृतः ॥ जगाम सह शिष्यैश्च रवौ मकरगे सति ॥ ६ ॥ माससमे कमुवासाथ स्नानार्थं मुनिपुङ्गवः ॥ स्नानैर्दानैस्तथा होमैः

पूजनैश्च सुभोजनैः ॥ ७ ॥ एवमर्चयतस्तस्य मासोऽभूत्क्षेत्रराजके ॥ ततो गयां समासाद्य पितॄणां निष्कृतिःकृता ॥८॥ गदाधरं लोकनाथं लक्ष्मीशं बहुलक्षणम् ॥ तं दृष्ट्वा पूजयामास भक्त्या परमया मुदा ॥ ९ ॥ अथ प्रतस्थे स्वं देशमहिच्छत्रसमीपगम् ॥ स ददर्श महातेजाः पित्रा प्राप्तं पुरातनम् ॥ १० ॥ राजमन्दिरतुल्यं तु पताकाभिरलंकृतम् ॥ मन्दिरं जनसंकीर्णं नानावृक्षैश्च शोभितम् ॥ ११ ॥ वेदशास्त्रार्थसंवादैर्विद्वद्भिः परिपूरितम् ॥ प्रविश्य स तु मेधावी विवेश पितुरासनम् ॥ १२ ॥ एतस्मिन्नन्तरे सर्वे ह्यागतं

तं तपोनिधिम् ॥ प्रणेमुस्तादृशाः सर्वे क्षेमपूर्वमभाषत ॥ १३ ॥ तेषां मध्ये बन्धुवर्यो भ्रातास्ते बालक स्त्वयम् ॥ इति प्रसादितः सर्वैर्वाचा मधुरया मुदा ॥ १४ ॥ अङ्के भ्रातरमादाय मूर्ध्न्युपाघ्राय प्रेमतः ॥ भ्रातस्त्वं वेद सर्वं हि पित्रा सम्पादितं धनम् ॥ १५ ॥ अत्रैव सुचिरं कालं स्वस्थचित्तः सुखी वस ॥ गृहाण रत्नमेकं हि मात्रा दत्तं पुरा मम ॥ १६ ॥ सुवर्णप्रदमेतत्तु रक्षणीयं प्रयत्नतः ॥ इति सन्तोष्य बहुधा सान्त्वयित्वा यथामति ॥ १७ ॥ उपयेमे ततो भ्रातुराज्ञया कमलाभिधाम् ॥ हरदत्तसुतां कन्यां रूपलावण्यशालिनीम्

॥१८॥ विद्या धरोऽपि सुप्रीतश्चागतैः स्वजनैर्वृतः ॥ अग्निना सह वध्वा च रथमारुह्य सत्वरः ॥ १९ ॥ आगत्य स्वगृहं बालश्चकार गुरुवन्दनम् ॥ ब्राह्मणान्भोजयामास विदुषो वेदवित्सतः ॥ २० ॥ ततो गुणनिधिः स्वस्थः प्रयाणायमनोदधे ॥ आश्वास्य भ्रातरं सम्यगविमुक्तमगान्मुनिः ॥ २१ ॥ पश्यन् जनपदान् रम्यानङ्गवङ्गकलिङ्गकान् ॥ काश्मीरान् मगधान् कर्पूनतिचक्राम विस्मितः ॥ २२ ॥ उत्तीर्य गङ्गां तरसा गण्डक्याः परतः स्थितम् ॥ भार्गवस्याश्रमपदं ददर्शातीव निर्मलम् ॥२३॥ तत्र स्थितं गुणाध्यक्षं पार्वतीप्रि- ॥ ६ ॥

यनन्दनम् ॥ कर्तुं सपर्यां रुरुहे पर्वतं श्वापदावृतम् ॥२४॥ किन्नरैरप्सरोभिश्च गन्धर्वाद्यैश्च सेवितम् ॥ सृष्ट्यादौ ब्रह्मणा सृष्टिं कर्तुं निर्विघ्नकांक्षया ॥ २५ ॥ पूजितं मायया सार्धं ननाम गणनायकम् ॥ पूजया मास बहुधा फलपुष्पादिभिः सह ॥ २६ ॥ सुप्री तस्तु गणाध्यक्षो ययाचे रत्नमुत्तमम् ॥ मुनिः प्रादाद्गणेशस्य हस्ते दत्त्वा तुतोष ह ॥ २७ ॥ तद्रत्नं भक्षयामास करेण गणनायकः ॥ तदादि रत्नगर्भेति आहुस्ते मुनिपुङ्गवाः ॥ २८ ॥ एवं गतेषु कालेषु भक्त्या तुष्टो विनायकः ॥ स्वप्ने तु प्रददे हैमं सम्पुटं रत्नमण्डितम् ॥ २९ ॥

बद्ध्वा निक्षिप्य शय्यान्ते ग्रन्थिं शिश्ये ततः परम् ॥ प्रभाते स कृतस्नानो भार्गवस्याज्ञया मुनिः ॥ २० ॥ ग्रन्थिं गृहीत्वा शिष्येण मुनिदत्तेन स द्विजः ॥ मार्गमध्ये विलोक्यैकमाश्रमं कमलालयम् ॥ २१ ॥ मयूरहंसकारण्डनिनदैः प्रतिनादितम् ॥ शार्दूलसिंहमहिषैर्गोनागहयमानुषैः ॥ २२ ॥ स्पर्धां विहाय खेलन्ते अन्योन्यमिहशायिनः ॥ अत्रा गतानां जन्तूनां शान्तिप्रदममन्यत ॥ २३ ॥ अत्र स्थेयं मयाप्यद्य स्थित्वा स्नानादिकर्म च ॥ इति निश्चित्य स मुनिर्वासं कर्तुं मनो दधे ॥ २४ ॥ लब्ध्वा प्रसादं पद्मायास्तत्रस्थैः शान्त-

मानसैः ॥ एकं निनाय दिवसं कथाभिः शुभकर्मणः ॥ २५ ॥ ततः प्रभातवेलायां शिष्यं कृत्वाऽग्रतः सुधीः ॥ समीपमगमत्काश्या वृद्धकालेशसंज्ञितम् ॥ २६ ॥ तत्पार्श्वे कपिले तीर्थे गङ्गातीरे द्विजोत्तमः ॥ चकार वसतिं तत्र ध्यायान्विश्वेश्वरं महः ॥ २७ ॥ तस्मिन्नेव दिने रात्रावाचार्यः शङ्करो मुनिः ॥ भास्करेन्द्रसरस्त्यक्त्वा शिष्येणसहसाऽययौ ॥ २८ ॥ तयोरागमनं श्रुत्वा कुमारोहृष्टमानसः ॥ सम्यक्पूजितहेरम्बो निर्ययौ कपिला श्रमात् ॥ २९ ॥ दशाश्वमेधघट्टेऽस्मिन्नृपतुर्मुनिभास्करौ ॥ तयोः संदर्शनाकांक्षी जगाम तु

तदन्तिकम् ॥ ४० ॥ गुरुचरणसरोजं द्रष्टुकामोऽतिहृष्टः पशुपतिकृपयासौ तौ मुनीन्द्रौ ददर्श ॥ अलिरिव चरणाब्जे तन्मनः संविलीनं स्वयमपि प्रणनामादंडवत्संस्थिरायां ॥ ४१ ॥ इति श्रीज्ञानदीपिकायां गुरुशिष्ययोः संदर्शनं नाम द्वितीयोऽध्यायः ॥ २ ॥

शिष्या ऊचुः । देवनाथ गुरो स्वामिन् किमकुर्वत ते त्रयः ॥ सर्वं विस्तार्य नो ब्रूहि श्रोतुमिच्छामेह वयम् ॥ १ ॥ गुरुरुवाच । भो भोः शृणुध्व मेतेषां वृत्तान्तं वच्मि साम्प्रतम् ॥ तद्ब्रह्मैक्यानुसन्धानं हृदयग्रन्थिभेदकम् ॥ २ ॥ स्नात्वा

प्रत्यूषकाले तु गुरू शङ्करभास्करौ ॥ बालस्य गौरवं दृष्ट्वा-मोदेतां कामितार्थदौ ॥ ३ ॥ रेरेऽर्भक कुतस्त्वं हि को देशः कतमः पिता ॥ किमर्थमागतः सौम्य किं कार्यं वद नौ पुरः ॥ ४ ॥ करवावाचिरादेव ब्रह्मादीनां च दुर्लभम् ॥ महर्षिजनकादैश्च कपिलाद्यैश्च दुर्लभम् ॥ ५ ॥ उपदेक्ष्यति ते प्राज्ञ गूढं भास्करदेशिकः ॥ मत्तः प्राप्यं हि यद्यच्च तत्सत्यं प्राप्स्यसि ध्रुवम् ॥ ६ ॥ इति विज्ञापितो बालः प्रहसन्निदमब्रवीत् ॥ कृपा तिष्ठतु मय्येका पूर्णा ब्रह्मकलावृता ॥ ७ ॥ अनुग्रहं विना सर्वं नश्वरं वेद्मि सद्गुरो ॥ तस्माद्विधेहि यत्प्रे-

यस्तदवाच्यं हि केवलं ॥ ८ ॥ अहिच्छत्रं तु मे देशः सुतो विश्वपतेर्गुरोः ॥ गुरो गुणनिधिर्मां हि एवमाह महाबलः ॥ ९ ॥ तदादेशादिहायातः काशीं गच्छेति मां पुरा ॥ आयाति शङ्कराचार्यः पूरयेच्च मनोरथम् ॥ १० ॥ अवाप्य मनसोऽभीष्टं ब्रह्मीभूतो भविष्यसि ॥ दैवयोगान्मया प्राप्तं दर्शनं मोक्षदायकम् ॥ ११ ॥ ओं नमो भास्करेन्द्रायश ङ्कराचार्यतेजसे ॥ नमः संसृतिहर्त्रे च कर्त्रे कैवल्यहेतवे ॥ १२ ॥ इत्थं बालकरूपस्य वेदांतार्थस्य निश्चयम् ॥ विज्ञाय सकलं वृत्तमन्योन्यमूचतुः स्फुटम् ॥ १३ ॥ भास्करेन्द्र यते स्वामिन् योग्योऽयं भक्तिमान् शुचिः ॥ स्वीकर्तुं ब्रह्मविद्यां च पात्रो भवति वेत्सि मे ॥ १४ ॥ इति श्रुत्वा गुरोर्वाक्यं भास्करेन्द्रसरस्वतिः ॥ मेने चराचरस्यास्य सम्प्रदाय प्रवर्तकम् ॥ १५ ॥ आहूय बालकं स्वाङ्के निवेश्य ध्यानतत्परः ॥ संन्यासं सर्वकर्मभ्यः प्रेषोच्चारणपूर्वकम् ॥ १६ ॥ तारकं ब्रह्मकैवल्यमुपादिशत्स भास्करः ॥ योगपट्टं सम्प्रदायं देवतां तीर्थमादितः ॥ १७ ॥ दर्शयामास तत्सर्वमेवं संन्यासलक्षणम् ॥ वराहो देवता तीर्थं तुङ्गभद्रा वराहजा ॥ १८ ॥ भूरिवालं योगपट्टं विश्ववन्द्यसरस्वती ॥ इति संन्यस्य

कुशली कर्म संन्यासमातनोत् ॥ १९ ॥ ब्रह्मभूतस्तदादध्यौ दृष्टवान् सकलं जगत् ॥ गुरवे प्रददौ हैमं रत्नगर्भविनायकम् ॥ २० ॥ प्रत्यहं स्वर्णरत्नौघान् प्रसूयन्तं ज्वलत्प्रभम् ॥ शिष्याय गुरुराचार्यश्चन्द्रमौलीशसंज्ञकम् ॥ २१ ॥ नरसिंहस्य वै मूर्तिं सलक्ष्मीकामदात्तदा ॥ दशाश्वमेधघट्टे तु मठमेकं चकार सः ॥ २२ ॥ विचेरुरस्यां यतयस्त्रयस्तदा पाषण्डवादानिव खण्डयन्तः ॥ जग्मुः प्रहर्षं मनसा विचिन्त्य समासदन्त्सर्वसुरेश्वरालयम् ॥ २३ ॥ तत्रैकमाहूय द्विजं महान्तं निमन्त्र्य तस्मै समयं चकार ॥ दिग-

न्तरस्थान्परदेशवासिनः काशीपुरस्थान् द्विजपुङ्गवांश्च ॥२४॥ आनेतुं प्रेषयामास चारान् लघुपदान्बहून् ॥ परेद्युः सायमायान्तु इत्युक्त्वा गूढचारिणः ॥ २५ ॥ गत्वा निवेदयामासुर्देशान्तरगतान्प्रति ॥ कोटिशो ब्राह्मणान्भोक्तुं व्यवसीदति नो गुरुः ॥२६॥ काशीं गन्तुं मतिं चक्रुर्देशान्तरगता द्विजाः॥ तस्यामेव रजन्यांतु सस्मरुर्गुरवः सुरान् ॥२७॥ इन्द्रादिलोकपालांश्च सिद्धगन्धर्वकिन्नरान् ॥ मुनीन्नृपगणान्त्सर्वान् नारदादीनथोरगान् ॥ २८ ॥ पुरस्ताद्विश्वकर्माणं प्रेषयामास देवराट् ॥ चिन्तामणिं कामधेनुं कल्पवृक्षं ततः परम् ॥२९॥

पूर्वपश्चिमयोरन्तर्दक्षिणोत्तरयोस्तथा ॥ योजनायतदेशोऽभूत् तत्र शालां चकार सः ॥ ३० ॥ अन्तःशालां वहिःशालां सूक्ष्मशालां ततस्ततः ॥ इन्द्रादयः सुराः सर्वे धृत्वा ब्राह्मणलाञ्छनम् ॥ ३१ ॥ न्यवसन् तत्र शालायां षड्विंशो देवमूर्तयः ॥ आगता ब्राह्मणाः सर्वे देशदेशाधिवासिनः ॥ ३२ ॥ चन्द्रमौलीश्वरं लिङ्गं रत्नगर्भविनायकम् ॥ पूजयामास यतिराट् नरसिंहं श्रिया युतम् ॥ ३३ ॥ रत्नपुष्पैः स्वर्णपुष्पैर्धूपदीपोपहारकैः ॥ फलैरन्यैरनेकैश्च पक्वैर्मधुरसावृतैः ॥ ३४ ॥ नृत्यैरप्सरसां गीतैर्गायनैर्वैणिकैस्तथा ॥ महानीराजनैरेवमिन्द्रनीलादिनिर्मितैः ॥ ३५ ॥ वेदघोषैश्च वादित्रैर्भेरीपटहनिस्वनैः ॥ ततो निवेशयामासुः पात्राणि च बहूनि च ॥ ३६ ॥ व्यञ्जनानि ददुस्तेषु शाकानि विविधानि च ॥ अन्नादीन् दापयामासुर्भक्ष्यलड्डुकराशिभिः ॥ ३७ ॥ मधुशर्करपूगैश्च दधिक्षीरघृतामृतैः ॥ ब्राह्मणान् तोषयामासुर्देवताश्छन्नमूर्तयः ॥ ३८ ॥ रत्नराशीन् स्वर्णराशीन् ताम्बूलान् प्रददुर्मुदा ॥ यथा मनोरथाः पूर्णास्तथाऽगृह्णन्द्विजोत्तमाः ॥ ३९ ॥ हृष्टाः पुष्टा द्विजाः सर्वे मानिताः स्वगृहं ययुः ॥ एवं चकार यतिराट् साधुवादस्तदाभवत् ॥ ४० ॥ अथागमन्त्सुरालयात्स-

मात्रविप्रभोजनात् विरंच्यविश्वकर्मणा कृतं मठं यतीश्वराः ॥ यथा त्रिलोकमानुषैर्विलोक्य विस्मयं तथा गतं स्वदेशमन्दिराण्यनेकभारमुद्वहैः ॥ ४१ ॥ प्रविश्य स्वमठं रम्यमिन्द्रमन्दिरसंनिभम् ॥ गुरुणा द्विजवेषेण चक्रे वास्तुविधानतः ॥ ४२ ॥ तत्राप्यनेकदानानि महादानानि षोडश ॥ गजदानं गवां वृन्दं हिरण्यानि च कोटिशः॥ ४३ ॥ भोजनानि यथापूर्वं चक्रुस्तत्र यतीश्वराः । तस्यां रात्र्यां व्यतीतायामुत्थाय यतिपुङ्गवाः ॥ ४४ ॥ स्नात्वा सरस्वतीतीर्थे कुर्वतेस्माह्निकक्रियाः ॥ ततः शारीरकं भाष्यं प्रस्थानस्य

चतुष्टयम् ॥ ४५ ॥ विश्ववंद्यसरस्वत्यै पाठयामास शंकरः॥ रेजतुः पश्यतां मध्ये चन्द्रसूर्याविव स्थितौ ॥ ४६ ॥ अन्तर्दधाते तत्रैव मठे शङ्करभास्करौ॥ जग्मतुः स्वेच्छया शिष्यं हित्वा मायापुरीं तदा ॥ ४७ ॥ इत्याख्वा मनसि गतं गुरोः प्रसादं ब्रह्माद्यैरमरगणैरलभ्यमेव ॥ सन्दध्यौ सुमतिरहो तदा विचित्रं सन्धत्ते खलु महतीं रुजं वियोगः ॥ ४८ ॥ इति श्रीज्ञानदीपिकायां ब्रह्मविद्याकथनं नाम तृतीयोध्यायः॥३॥

शिष्या ऊचुः ॥ ॥ भास्करेन्द्रे गते यात्रां गुरावाचार्यसत्तमे ॥ विश्ववन्द्ययतिः स्वामिन् किं चकार वदस्व नः ॥१॥

सर्वज्ञगुरुरुवाच ॥ पश्चात्काश्यां यतिर्भाष्यं पाठयामास पण्डितान् ॥ नारायणेन्द्रनामानं शिष्यं चक्रे सुधानिधिम् ॥ २ ॥ योगैर्ज्वलन्तमाचार्यं विश्ववन्द्ययतीश्वरम् ॥ आजगाम महाराजो द्रष्टुं काश्याश्च भक्तितः ॥ ३ ॥ अपूर्वश्रुतमाहात्म्यं श्रुत्वा विस्मयकारकम् ॥ उपायनैःस क्रियाभिर्युक्तः सन्नतिविस्मितः ॥ ४ ॥ शिष्यास्ते कथयामासुः समीपे नृपमागतम् ॥ कल्पयामासुरास्थानेष्वासनानि सहस्रशः ॥ ५ ॥ नृपस्य मुख्यमास्थाने कल्पयामासुरासनम् ॥ दीपज्वालाप्रकाशेन अमात्यैः सहपण्डितैः ॥ ६ ॥ आस्थानं प्रतिपद्यैव- ॥ १३ ॥

अन्तरान्तरसंस्थितम् ॥ यथायोग्येष्वासनेषु तस्थुर्नृपमुखास्तदा ॥ ७ ॥ आगतं नृपमालोक्य सभास्थानमगाद्यतिः ॥ आयान्तमुत्थिताः सर्वे दृष्ट्वा यतिवरं जनाः ॥ ८ ॥ उच्चासने समाविष्टो विश्ववन्द्यो गुरुः स्वयम् ॥ प्रणेमुरागताः सर्वे गूढोपायनपाणयः ॥ ९ ॥ आहिताः पुरतः स्वामी फलोपायनसत्क्रियाः ॥ दृष्ट्या विलोकयामास शिष्या निन्युर्गृहान्तरम् ॥ १० ॥ उपविश्य ततो राजा निर्मिते विश्वकर्मणा ॥ ॥ यतिरुवाच ॥ राजन् कुशलिनः सर्वे त्वदीयाश्च त्वमप्यसि ॥ भूषणैःश्लक्ष्णवसनैर्भूषयामास तं नृपम् ॥ पण्डिता

मानिताः सर्वे मन्त्रिणोन्ये च ये स्थिताः ॥ १२ ॥ यथार्हं पूजया मुक्ताहारकेयूरकङ्कणैः ॥ गुरुं प्रसादयामास लब्ध्वानुग्रहमुच्चकैः ॥ १३ ॥ राजा जगाम सदनं गजवाजिरथादिभिः ॥ प्रविश्यान्तःपुरं स्वानां कथयन् चरितं गुरोः ॥ १४ ॥ वयं धन्याः कुलं धन्यमित्युवाच नृपो बली ॥ ध्यायन्माहात्म्यमतुलमात्मकार्योत्सुकोऽभवत् ॥ १५ ॥ ततो नारायणेन्द्राय विश्ववन्द्ययतिः स्वयम् ॥ शारीरकादिभाष्यान्तं पाठयामास सत्वरम् ॥ १६ ॥ विश्वस्य सकलं तस्मिन् नारायणयतीश्वरे ॥ स ध्यात्वा गुरुपादाब्जं ब्रह्मसायुज्यमाप्तवान् ॥ १७ ॥ ततः सिद्धिं गते शिष्ये यतिधर्मविधानतः ॥ कर्त्तव्यं कारयामास शिष्येणैकेन यत्नदा ॥ १८ ॥ ध्यात्वा विश्वेश्वरं साम्बं विन्ध्याचलनिवासिनीम् ॥ भवानीं द्रष्टुकामःसन् प्रयाणमकरोद्यतिः ॥ १९ ॥ क्रमादागत्य विन्ध्याद्रिं गङ्गायां स्नानमातनोत् ॥ नारायणेन्द्रयतिराट् सशिष्यः सपरिच्छदः ॥ २० ॥ समारुह्य गिरिं विन्ध्यं प्रविवेशाम्बिकालयम् ॥ दृष्ट्वा बालां जगद्धात्रीं पीनोन्नतकुचानताम् ॥ २१ ॥ विद्युत्प्रभां महामायां नीलोत्पलविलोचनाम् ॥ श्यामाङ्गीं मदिरास्वादलालसां सुरसुन्दरीम् ॥ २२ ॥

॥ १४ ॥ ॥ १४ ॥

ननाम शिरसा भूमौ स्तुवन्स्तोत्रैर्ननर्त च ॥ नमस्ते विन्ध्य-
वासिन्यै नमस्ते शङ्करप्रिये ॥ २३ ॥ नन्दगोपकुले जाते
नमस्ते विष्णुवल्लभे ॥ नमस्तेऽसुरविध्वंसे विधात्र्यै ते नमो
नमः ॥ २४ ॥ एवं चकार परया भक्त्या स्तवमतन्द्रितः ॥
गते बहुतिथे काले भक्तवात्सल्यगौरवात् ॥ २५ ॥ प्रसन्ना
वरदा तस्मै चण्डिकाभूत्तपस्विने ॥ वरदास्मि यते त्वं च
वरं वरय वाञ्छितम् ॥ २६ ॥ बद्धाञ्जलिपुटःसोपि प्रहस-
न्वाक्यमब्रवीत् ॥ वरमिच्छामि चेद्दातुं सर्वदा महशा भव
॥ २७ ॥ वेदान्तादिषु शास्त्रेषु वादे यत्कथ्यते मया ॥ सत्यं ॥ १९ ॥

भवतु तत्सर्वं प्रतिवादिभयंकरम् ॥ २८ ॥ इमं प्रदेहि
सुभगे वरं मे वाञ्छितं चिरात् ॥ वत्स वक्ष्यामि यद्रूपं सर-
स्वत्या ममानघ ॥ २९ ॥ तेन सौम्येन रूपेण सौम्येन
तपसा तव ॥ इतो गच्छ यते दूरं सह्यपर्वतसन्निधौ ॥ ३० ॥
अहमप्यागमिष्यामि वसामि तव सन्निधौ ॥ तस्य पर्वत-
सामीप्ये गोकर्णं क्षेत्रमुत्तमम् ॥ ३१ ॥ तत्र तिष्ठ मठं
कृत्वा पाठयस्व निरंतरम् ॥ निर्जिताः सर्ववेदान्तवादिनो
माध्वसौगताः ॥ ३२ ॥ पादाक्रान्ता भविष्यन्ति ह्यन्ये
पाखण्डवादिनः ॥ दत्त्वा वरद्वयं तस्मै यतये सा तिरोदधे

॥ ३३ ॥ यतिर्लब्ध्वा वरं शिष्यैर्ययावुज्जयिनीं पुरीम् ॥ आयान्तं यतिमालोक्य ज्वलन्तं पावकं यथा ॥ ३४ ॥ तद्दे-शवासिनः सर्वे राजानं प्रोचुरादरात् ॥ राजन्नुदयशैलाग्रादा यान्तमिव भास्करम् ॥ ३५ ॥ द्रष्टुमर्हसि भद्रं ते यतिमि ष्टार्थदायकम् ॥ आकर्ण्य विक्रमार्कोऽसौ राजा भूमण्डलाधिपः ॥ ३६ ॥ अमात्यैर्ब्राह्मणैः पौरै रथाश्वगजपत्तिभिः ॥ अमूल्योपायनैरन्यैःफलपुष्पैर्मनोहरैः ॥ ३७ ॥ वादित्रैःपट-हैर्भेरीमर्दलैःकाहलैस्तथा ॥ एवं वाद्यैरनेकैश्च नादयंश्च दिशो दश ॥ ३८ ॥ ततः समीपमापन्नः प्रणनाम यतिं

नृपः ॥ उपायनानि सर्वाणि स्थाप्य क्षेममभाषत ॥ ३९ ॥ सोऽप्यपृच्छत्ततः क्षेममन्योन्यं चक्रतुः स्वकम् ॥ राजोवाच ॥ इतः परं न गन्तव्यं पादचारेण वै यते ॥ ४० ॥ गजस्य पृष्ठे सौवर्णे मण्डपे रत्ननिर्मिते ॥ मुक्ताविद्रुममुच्छ्राढ्ये चित्रपुत्त-लिकावृते ॥ ४१ ॥ भवंत एव तिष्ठन्तु मुकुटाद्यैरलङ्कृताः ॥ धृतचामरहस्तौ वो जग्मिवांसं च पार्श्वतः ॥ ४२ ॥ यतिरुवाच ॥ अशीमहि वयं भिक्षां दिशो वासो वसीमहि ॥ शयीमहि महीपृष्ठे कुर्वीमहि गजैःकिमु ? ॥ ४३ ॥ भूषणैर्वाद्यनिर्घो-षैर्नि:स्पृहाणां निरर्थकम् ॥ राजोवाच ॥ मदीयं भवतां सर्वं

राज्यापत्यकलत्रकम् ॥ ४४ ॥ यतिरुवाच ॥ इति निर्वं-
धवाक्येन तथास्त्विति यतीश्वरः ॥ आरुरोह गजं योगी
पृष्ठतो भट्टिभूपती ॥ ४५ ॥ वीजयामासतुर्ह्याभ्यां चामराभ्यां
यतीश्वरम् ॥ करदीपसहस्रैश्च कोटिशो रत्नदीपकैः ॥ ४६ ॥
वारांगनासहस्रेण विवेश महतीं पुरीम् ॥ राजांगणं समा-
साद्य गजादुत्तीर्य वै यतिः ॥ ४७ ॥ महाकालेश्वरं नत्वा
प्रविवेश नृपालयम् ॥ आस्थाने विक्रमार्कस्य निर्मिते
विश्वकर्मणा ॥ ४८ ॥ पद्मरागादिमणिभिः खचिते सूर्य-
सन्निभे ॥ मुक्ताविद्रुमजालानां गुच्छवृन्दैरलङ्कृते ॥ ४९ ॥

शम्भोरनुग्रहालब्धे वासवेन मनोहरे ॥ द्वात्रिंशत्पुत्रिकाभिश्च
हसन्तीभिः समाश्रिते ॥ ५० ॥ पटेन स्वर्णवर्णेन छादिते
वलशालिभिः ॥ आगतं मुनिमालोक्य सिंहासनमकल्पयत
॥ ५१ ॥ जाज्वल्यमानं तेजोभिः समन्तान्निमिरापहम् ॥
न्यवीविशन्महायोगी तस्मिन् सिंहासने वरे ॥ ५२ ॥
कैलासशिखरे रम्ये पार्वत्या सह शङ्करः ॥ रेजे ब्रह्मादिदे-
वानां मध्ये कोट्यर्कसन्निभः ॥ ५३ ॥ तथा रराज यतिराट्
त्यक्तसर्वस्वनिःस्पृहः ॥ अजातपूर्वः सर्वेषामुत्सवः समजा
यत ॥ ५४ ॥ उत्थायारुह्य शिविकां काल्यायतनसन्निधौ ॥

विक्रमार्कस्य वचनान्निर्मिते शिल्पिनायकैः ॥ ५५ ॥ तस्मिन्मठाश्रमे रम्ये यानादुत्तीर्य सम्भ्रमात् ॥ प्रविश्यान्तः सदानन्दो यतिःसाम्राज्यलोलुपः ॥ ५६ ॥ अष्टाङ्गयोगनिरतो ध्यानोन्मीलितलोचनः ॥ नारसिंहं चन्द्रमौलिं पूजयामास संयमी ॥ योगिनो यतिवर्यस्य दृष्ट्वा माहात्म्यमद्भुतम् ॥ मुमोद मन्त्रिभिः सार्धं विक्रमादित्यभूपतिः ॥ ५८ ॥ राजेशं वर्णिनं शिष्यं चक्रे संन्यासकर्मणा ॥ वर्तयामास सुचिरं तेन शिष्येण धीमता ॥ ५९ ॥ तस्यापि ब्रह्मसत्त्वस्थमबोधयत वै यतिः ॥ विश्ववन्द्यो महाप्राज्ञो नारायणसरस्वती

॥ ६० ॥ कैवल्येन्द्रः प्रकाशेन्द्रः सर्वज्ञेन्द्रसरस्वती ॥ एते यतिवराः सर्वे सिद्धिं प्राप्ता मुमुक्षवः ॥ ६१ ॥ ब्रह्मलोकादिलोकांतेष्वष्टादश मुनीश्वराः ॥ मेरुः सुमेरुशिखरे वैकुण्ठे तस्थिरे सदा ॥ ६२ ॥ निर्बन्धान्नृपतेर्गजेन्द्रतुरगप्रत्युज्ज्वलान्दोलिकाशङ्खेन्द्वर्कनिनादपाण्डुरमहाच्छत्राणि केत्वादिकान् ॥ भेरीवासरज्योतिषां दश दिवा कृत्वाग्रभागे यतिः कस्मिन्नेव दिने चचार नगरे विद्वन्नृपैः सेवितः ॥ ६३ ॥ निर्ययौ विश्वनाथेन्द्रो ह्यवन्तीनामपत्तनान् ॥ गङ्गाधरेन्द्र शिष्येण नृपतेराज्ञया तदा ॥ ६४ ॥ पठन्ति शृण्वन्ति जनाः

पुरातनं पुण्यं यशस्यं भवबन्धमोचकम् ॥ भुक्त्वेह भोगान् सुरकाङ्क्षमाणान् प्रयांत्ययत्नं पदमच्युतस्य ॥ ६५ ॥ इति श्रीज्ञानदीपिकायां विक्रमादित्यस्य गुरुसंदर्शनमहिमवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ श्रीगुरुभ्योनमः ॥ ॥ ततो गोदावरीमूलं सप्तशृङ्ग-नगोद्भवम् ॥ त्रियंबकसमीपस्थं यतियोगिजनावृतम् ॥ १ ॥ तत्क्षेत्रं प्राप सर्वेशो गङ्गाधरसरस्वती ॥ स्नानार्थमागता गङ्गा-गिरिसागरपर्वताः ॥ २ ॥ ब्राह्मणाः सर्वदेशस्था राजानः स्ववलैर्वृताः ॥ भूमण्डलेश्वराः सर्वे ये चान्ये चक्रवर्तिनः ॥ १९ ॥

॥ ३ ॥ पादजा गजसिंहाश्च पशुपक्षिमृगादयः ॥ महान् कोलाहलो जज्ञे सर्वलोकभयङ्करः ॥ ४ ॥ वयं पूर्वं वयं पूर्वं स्नातुं वादो महानभूत् ॥ स्नातुं काङ्क्षन्ति गंगायां गौतम्यां देवतागणाः ॥ ५ ॥ सिंहं गते रवौ तस्यां तीर्थानि मिलि-तान्युत ॥ तीर्थराजमुखान्याहुरायान्तीति मनीषिणः ॥ ६ ॥ इति निश्चित्य सर्वे ते भूसुरास्तत्त्ववादिनः ॥ त्रिपञ्चसप्ततीर्थेषु स्नान्वा गोदावरीजले ॥ ७ ॥ सप्तशृंगमथारुह्य भद्रकालीं महाद्युतिम् ॥ अष्टादशभुजां देवीं द्योतयन्तीं दिशो दश ॥८॥ पूजयामास यतिराट् मुनियोगिद्विजैः सह ॥ नियोगाद्वि-

क्रमार्कस्य आनीतैःफलराशिभिः ॥ ९ ॥ सुगन्धैर्मल्लिकाजातिपूगपुन्नागपङ्कजैः ॥ अघ्रगंधयुतैर्गंधैः कस्तूरीकेसरादिभिः ॥ १० ॥ भारेणैकेन तुलितैर्लेपयामास चण्डिकाम् ॥ विचित्रभक्षभोज्यैश्च स्रवत्पीयूषबिन्दुभिः ॥ ११ ॥ घृतपक्वैरनेकैश्च नैवेद्यैर्विस्मयावहैः ॥ भारैःशतैश्च कर्पूरैरारार्तिं च चकार सः ॥ वन्दनप्रार्थनास्तोत्रैर्नृत्यैर्जयजयेति च ॥ १२ ॥ आस्वाद्य किंचित्तच्छेषं गोराष्ट्रादागतैर्द्विजैः ॥ अवातरत् ततःशृङ्गात्सूर्यकुण्डादधोभुवम् ॥ १३ ॥ सूक्तैः प्रियहितैर्वाक्यैर्गोराष्ट्रादागतैर्जनैः ॥ बोधितो वेदविद्वद्भिःशालनिर्जितदुर्मुखैः ॥ १४ ॥

॥ २० ॥

प्रार्थितो योगनिरतैर्ज्ञानिभिर्हैवदेशिभिः ॥ ब्राह्मणा ऊचुः ॥ स्वामिन्नागम्यतां देशमस्मदीयं धनैर्वृतम् ॥ गोकर्णक्षेत्रराजाढ्यं नानाधान्यसमाकुलम् ॥ १५ ॥ मरीचिपूगकदलीनालिकेरादिभिर्वृतम् ॥ अन्यैर्बहुविधैर्युक्तं नानादेशसमागतैः ॥ १६ ॥ अद्यप्रभृति युष्माकं शिष्या एव न संशयः ॥ यूयं हि गुरवोऽस्माकं दोषादोषविवेकिनः ॥ १७ ॥ भवत्पादाज्ञया सर्वे वर्तिष्यामो वयं ध्रुवम् ॥ इति निश्चित्य ते सर्वे तत्पादस्पर्शिनोभवन् ॥ पालिता वन्दिताश्चापि रक्षिताः शिक्षिता वयम् ॥ १८ ॥ अन्यत्र वार्ता न ब्रूमो लंघितास्तव

शासनम् ॥ आकर्ण्य वचनान्येवं प्रतिज्ञापूर्वकान्यहो ॥ १९ ॥
ओमित्युक्तं यतिवरैर्जयभेरीमताडयन् ॥ सिद्धिमेको गतं
शिष्यो गोदावर्युत्तरे तटे ॥ २० ॥ ब्रह्मलोकं जगामैवमूचिरे
गुरुसन्निधौ ॥ गोकर्णगमने सक्तः प्रोचे नेमितसेवकान् ॥
सज्जीभवत यूयं हो नेमयध्वं बहिर्जनान् ॥ २१ ॥ अग्रे
गच्छन्तु सर्वेते वृषाश्वा भारवाहिनः ॥ अनुगन्तुमशक्ता ये
तेऽपि निर्यान्तु पण्डिताः ॥ गोराष्ट्रवासिना कृष्णशर्मणा
दर्शिते पथि ॥ विदुषा रङ्गनाथेन तेन गोकर्णवासिना ॥२२॥
विक्रमार्केण भूपेन मण्डपाः कारिता भृशम् ॥ तत्र तत्र

विरम्यन्तां यतयो ब्राह्मणा जनाः ॥ २३ ॥ भुक्त्वा पीत्वा
शयित्वा च निर्यातुं सकलं बलम् ॥ सह्याद्रेः पूर्वदिग्भागे-
ऽप्यास्ते वानवसीपुरम् ॥ २४ ॥ मिलित्वा तत्र तिष्ठन्तु
द्विजैर्गोकर्णवासिभिः ॥ श्वो मध्याह्ने परश्वो वा प्रयाम यति-
भिर्वयम् ॥ २५ ॥ एवं नियम्य स मुनिर्गङ्गाधरयतीश्वरः ॥
ततो वानवसीं प्राप्य तस्थुः सर्वे द्विजातयः ॥ २६ ॥ विरुदैः
सह सोभ्येत्य मधुकेश्वरसन्निधौ ॥ ततःसह्यगिरिं पश्यन् तार-
यामास तं गिरिम् ॥ २७ ॥ शुक्तिमत्या नदीतीरे कारयामास
मण्डपम् ॥ अभोजयद्ब्राह्मणानां दशसाहस्रमन्वहम् ॥ २८ ॥

गौराष्ट्राधिपती राजा नमस्कृत्वेदमब्रवीत् ॥ स्वामिन्मठं च गोकर्णे कारयामास शिल्पिराट् ॥ २९ ॥ शासनाद्विक्रमार्कस्य संभारैः परिपूरितम् ॥ अयुतानां ब्राह्मणानां दातारो भवताधुना ॥ ३० ॥ अन्नदानादिसर्वाणि कारयध्वं यथेच्छया ॥ तथेति मण्डपात्तस्मात्प्रययावघनाशिनीम् ॥ ३१ ॥ तीर्त्वा तां साधनोपायैः प्राप गोकर्णमण्डलम् ॥ सर्वैर्द्विजवरैः सार्धं विरुदावलिभिस्तदा ॥ ३२ ॥ करदीपसहस्रैश्च वेदवादित्रगायनैः ॥ वीथीषु सकलास्वेव कोटितीर्थसमं ततः ॥ ३३ ॥ आलोक्य निर्मितं स्थानमुत्तीर्य शिबिकासनात् ॥ प्रविश्या- ॥ २२ ॥

न्तर्ज्वलत्सिंहमासनं प्रविवेश सः ॥ ३४ ॥ उपविष्टं तदा लोका नमश्चक्रुः पृथक्पृथक् ॥ यतयो ज्ञानिनो मान्या विद्वांसो वेदपाठकाः ॥ ३५ ॥ गृहीत्वाज्ञां गताःस्थानं गङ्गाधरयतीश्वरात् ॥ यथार्हं पूजितास्ते तु जग्मुः स्वं स्वं निवेशनम् ॥३६॥ उत्थायान्तः प्रविश्याथ सुष्वाप शयने यतिः॥ प्रातरुत्थाय विधिवदस्नायीत्कोटितीर्थके ॥ ३७ ॥ समाप्य प्रातराह्निकं प्रणवध्यानतत्परः ॥ दौहित्रो विक्रमार्कस्य चन्द्रसेन इति श्रुतः ॥ ३८ ॥ तस्मिन्नेव क्षणे राजा वचनं वेदमब्रवीत् ॥ मठस्यास्योपयोगार्थं देयं ग्रामचतुष्टयम् ॥३९॥

तदर्थं शिल्पिनः प्राज्ञानानयेति भटान्प्रति ॥ स्नात्वा तीर्थ-
जले राजा गुरुसामीप्यमागतः ॥ ४० ॥ पुरतो नरसिंहस्य
चन्द्रमौलेस्तु बुद्धिमान् ॥ अंसवादागसेमाडगेरेग्रामचतुष्ट-
यम् ॥ ४१ ॥ दास्यामि देवताभ्यश्च नित्यनैवेद्यकल्पितम् ॥
सहिरण्याम्बुधाराभिर्ददौ संकल्पपूर्वकम् ॥ पूर्वादिषु चतु-
र्दिक्षु ग्रामाणां च समन्ततः ॥ ४२ ॥ अश्मानि स्थापया-
मास शिल्पिभिः कुशलैरपि ॥ ततः स्वभवनं प्रायाच्चन्द्रसेन-
स्तदाज्ञया ॥ ४३ ॥ सरस्वतीभारतीन्द्रतीर्थाश्रमपदाश्रयैः ॥
षट्नामभिरानन्दप्रकाशारण्यपूर्वकैः ॥ ४४ ॥ संप्रदायव-

रैस्तैस्तु मुनिभिर्यतिभिर्नुतः ॥ गङ्गाधरेन्द्रस्तान्भाष्यैः पाठ-
यामास सर्वदा ॥ एवं शमदमैर्युक्तानपाठयत पण्डितान्
॥ ४५ ॥ इत्थं माहात्म्यमेतस्य गङ्गाधरयतेर्नृपः ॥ लिखित्वा
प्रेषयामास पत्राणि चरितं यतेः ॥ ४६ ॥ विक्रमार्कस्तु
पत्राणि दृष्ट्वामन्त्र्य मनीषिभिः ॥ निश्चित्याज्ञापयामास
मन्त्रिणे भट्टिशर्मणे ॥४७॥ मन्त्रिन् सकलधर्मज्ञ लिखित्वा
पत्रमद्य वै ॥ विरचय्य मयोक्तानि प्रेषयस्व सुधापुरीम् ॥४८॥
नृसिंहवीरभूपाल राज्ये तव महत्तरे ॥ तृणपर्णजलैर्युक्तान्
सुक्षेत्रारामविस्तृतान् ॥ ४९ ॥ ग्रामान्विंशतिसंख्याकान्क-

र्बुकब्राह्मणावृतान् ॥ एवं समर्प्य पादाब्जे विश्ववन्द्यस-
रस्वतेः ॥ ५० ॥ तदाज्ञया तदीयानां यतीनां मोक्षकाङ्क्षि-
णाम् ॥ मठानि यत्र काङ्क्षन्ति तत्र निर्माय तक्षकैः ॥ ५१ ॥ ते
वसन्तु सुखं तेषु मठेषु यतयोऽमलाः ॥ प्रदाप्य वस्त्रपात्राणि
घृततैलगुडानि च ॥ ५२ ॥ धान्यान्यन्यानि सर्वाणि गवां
शतशतानि च ॥ वर्षपर्याप्तभूतानि कल्पयाशु मठेषु वै
॥ ५३ ॥ इत्येवं विक्रमार्कस्य लिखित्वा शासनं बुधः ॥
सुधापुरीश्वरं पूर्वं चालयामास पत्रिकाम् ॥५४॥ जामात्रे
चन्द्रसेनाय चागतैर्गूढचारिभिः ॥ सह संभाष्य तेषां हि

सत्क्रियाश्च प्रदत्तवान् ॥ ५५ ॥ पत्राणि दत्त्वा तद्दूते गच्छ-
ध्वमिति चाब्रवीत् ॥ आगतास्त्वरिता दूता चन्द्रावारेतिपत्त-
नम् ॥ ५६ ॥ नमस्कृत्य ददुस्तस्मै चन्द्रसेनाय धीमते ॥
विज्ञाय सकलं वृत्तं मुमोदातितरां नृपः ॥ ५७ ॥ प्रातरुत्थाय
यतये चन्द्रसेनो महामनाः ॥ वृत्तान्तमागतं तस्मै न्यवेदयत
भान्वते ॥ ५८ ॥ गङ्गाधरेन्द्रात्सञ्जे विश्वनाथसरस्वती ॥
तत्कराज्ज्ञ संजातो रामचन्द्रसरस्वती ॥ ५९ ॥ तस्य
शिष्यो महानासीन्माधवेन्द्रसरस्वती ॥ त्रयः सिद्धिं गता-
स्तत्र गोकर्णे क्षेत्रनायके ॥ ६० ॥ तस्मात्कराज्जसंजज्ञे

विश्ववन्द्यसरस्वती ॥ स्वग्रामान्द्रष्टुकामःसन् निर्ययौ यति-
मण्डलैः ॥ ६१ ॥ ग्रामाणां याश्च सीमाश्च तासु स्तम्भान्
शिलामयान् ॥ पश्यन्ययौ जनैःसार्धं ग्राम्यैस्तद्देशवासिभिः
॥ ६२ ॥ कडतोकेति भाषायामन्त्यांकिंचिति शाश्वतः ॥
तस्योपरि मठे रम्ये विश्ववन्द्ययतीश्वरः ॥ ६३ ॥ मोदया-
मास सुचिरं यतिभिर्यमिनांपतिः ॥ यतिवर्यौ गतौ सिद्धिं
कैवल्यं प्रापतुस्तदा ॥ ६४ ॥ समाधिं प्रापितोनेन दृश्यते-
द्यापि तत्र च ॥ एतस्मिन्नन्तरे काले वानवस्यधिपो नृपः
॥ ६५ ॥ स्वामिन्नागम्यतां तूर्णमिमां रम्यां सुधापुरीम् ॥

॥ २५ ॥

आज्ञया विक्रमार्कस्य मठाः षोडश कल्पिताः ॥ ६६ ॥ सह-
स्रलिङ्गं मद्गेहादेके तिष्ठति शाल्मली ॥ इति विज्ञाप्य पूजार्हं
गुरुं तूष्णीं बभूव सः ॥ ६७ ॥ गुरुरुवाच ॥ आगमिष्यामि
राजेन्द्र नरसिंह महीपते ॥ मत्पार्श्वनिरताः शिष्याः संप्र-
दायप्रवर्तकाः ॥ ६८ ॥ सरस्वतीभूरिवाळपट्टनामानि तेषु
वै ॥ त्वत्कल्पितेषु स्थानेषु तिष्ठन्त्वेते मुनीश्वराः ॥ ६९ ॥
ममाज्ञाकारिणस्त्वेते मत्प्रिया मत्परायणाः ॥ ग्रामान्मठा-
न्प्रदेहि त्वं सम्भारैः परिपूरितान् ॥ ७० ॥ ग्रामैश्चतुर्भिर-
स्माकं सम्भारैः परिपूरितम् ॥ सहस्रलिङ्गसंस्थानं नरसिंह-

प्रियं हि नः ॥ ७१ ॥ चन्द्रमौलेशभारत्योर्नृसिंहस्य सुरे-
शितुः ॥ इत्युक्त्वा निर्ययौ योगी विश्ववन्द्यसरस्वतिः ॥७२॥
अनुजग्मुस्तदा भूपाश्चन्द्रसेननृपादयः ॥ तद्देशवासिनो
विप्रास्तुरगादिसमन्विताः ॥ ७३ ॥ यतिभिर्मुनिभिः प्राज्ञैः
पण्डितैःसमलङ्कृतैः ॥ विक्रमार्केण दत्ताभिर्विंवारुबलिरा-
जिभिः ॥ ७४ ॥ सूर्यचन्द्रादिवादित्रैर्वन्दिभिर्गगनाभृतैः ॥
स्वयमारुह्य शिबिकां निर्ययौ तन्मठान्तरात् ॥ ७५ ॥ पञ्च-
पञ्चदिवाज्योतिः पार्श्वयोः प्राज्वलत्तदा ॥ मणिमत्पुरभूपालः
प्रयातो दर्शनोत्सुकः ॥ ७६ ॥ दृष्ट्वा ननाम शिरसा गुरुमा-

नन्दविग्रहम् ॥ स मेने जन्मसाफल्यं सुकृतैर्बहुजन्मनः ॥७७
ददौ रत्नसहस्राणि मुक्तामालाश्च पादुके ॥ श्वेतच्छत्रं चामरे
द्वे रत्नदण्डविराजिते ॥ ७८ ॥ ग्रामद्वयं ददौ तस्मै काङ्क्षन्नाज्ञां
समन्वगात् ॥ पश्यन्सह्यगिरिं प्राप मञ्जुखातेतिवैष्णवम्
॥ ७९ ॥ लक्ष्मीपतेर्निवासोत्र ब्रह्माद्यैः सेवितः पुरा ॥ भक्ता-
नुग्रहसिद्ध्यर्थमवतीर्णः श्रिया सह ॥ ८० ॥ तस्य दर्शनमा-
त्रेण सर्वार्थाः संभवन्ति हि ॥ अस्माभिरपि सेऽव्योसौ
यती राजानमब्रवीत् ॥ ८१ ॥ मण्डपं कारयामास सुधापु-
रपतिस्तदा ॥ वयमुर्यतिमुख्याश्च चन्द्रसेनादयो नृपाः ॥८२॥

ब्राह्मे मुहूर्ते चोत्थाय खाते स्नात्वा यतीश्वरः ॥ दृष्ट्वा तद्वैष्णवं धाम प्रणम्याभ्यर्च्य साधनैः ॥ ८३ ॥ संभारपूगै-रानीतैर्नृपामात्यजनैरपि ॥ यतयः पूजयामासुः श्रीनिवासं गुरुं तदा ॥ ८४ ॥ पश्यतां सर्वलोकानामुत्सवः समजायत ॥ निन्युश्च तद्दिनं सर्वे भोजनोत्सवदर्शनैः ॥ आनयामास यतिनं राजा पत्तनसन्निधिम् ॥ ८५ ॥ पत्तनस्य वहिर्द्वारि मिलित्वाप्यनुयायिभिः ॥ गैरिकादिविचित्राङ्गं स्वर्णशृङ्ग-लमण्डितम् ॥ ८६ ॥ कुथकेतुसमायुक्तं मुक्तामालादिभू-षितम् ॥ हिरण्यरज्जुभिर्बन्धमण्डपेन विराजितम् ॥ ८७ ॥

तमारुरोह न यतिः प्रार्थितो नृपमण्डलैः ॥ ८८ ॥ कार्ता-न्तिकं समाहूय सुमुहूर्ते सुलग्नके ॥ नानावर्णविचित्राढ्यां स्वर्णरेखाविराजिताम् ॥ ८९ ॥ प्रवालमुक्तारत्नौघैःसमन्ता-त्परिवारिताम् ॥ आरुह्य शिविकां रम्यां चित्रकारैर्विचि त्रिताम् ॥ ९० ॥ विवेश सकलैः सार्धं नानाज्योतिःप्रका-शिते ॥ आपणश्रेणिभिर्युक्ते पत्तने तिमिरापहे ॥ ९१ ॥ राज्ञामधिकृतान्येव मन्दिराणि ततस्ततः ॥ पश्यन्नेवं हि तेजोभिः शैववैष्णवमिश्रितम् ॥ ९२ ॥ आसेव्यमानममरैः साहस्रं लिङ्गमादरात् ॥ तस्मात्साहस्रलिङ्गाख्यं पुरा नाम

कृतं श्रिया ॥ १३ ॥ तत्स्थानमण्डयोगी दिग्वासान्धसरस्वती॥ प्रविश्यान्तः समासीनमासने सिंहमस्तके ॥ १४ ॥ स्वर्ण-रेखाविचित्राढ्यमण्डपान्ते बभौ यतिः ॥ राजा प्रणम्य विश्रान्तं गृहीत्वाज्ञां प्रचक्रमे ॥ १५ ॥ मणिमत्पुरराजापि चन्द्रसेनादयो नृपाः ॥ यतयः पण्डितामात्या जग्मुः कल्पि-तमण्डपम् ॥ १६ ॥ तान् विचार्य ययौ राजा प्राकारान्त-र्गृहं स्वकैः ॥ प्रविश्यान्तर्गृहंनिद्रां लेभे शय्यामुपागतः ॥ १७ ॥ उपस्युत्थाय ते सर्वे प्रणेमुर्गुरुमास्थिताः ॥ चन्द्रसेन-मुखा भूपा गृहीत्वाज्ञां प्रतस्थिरे ॥ १८ ॥ ततः स्वदेशरा-

जानमाहूय गुरुरब्रवीत् ॥ संप्रदायान्विताः पञ्चदश सन्ति यतीश्वराः ॥ ११ ॥ मठेषु स्थायिनः सन्तु मच्छासनकराः प्रभो ॥ वीरसिंहस्तथेत्युक्त्वा पृथङ्नामान्यकारयत् ॥ १०० ॥ राज्ञा प्रदापितान् ग्रामान् मठान्प्रापुःपृथक् पृथक् ॥ १ ॥ सरस्वतीसंप्रदाया गुरुध्यानपरायणाः ॥ नरसिंहस्य पूजायां नित्यमासक्तचेतसः ॥ २ ॥ देवतार्हाणि रम्याणि फलपुष्पाणि सर्वदा ॥ मठेभ्यः प्रेषयामासुर्विश्ववंद्याय धीमते ॥ ३ ॥ एवमासन् तदा शिष्या विश्वदन्यपदानुगाः ॥ अन्ये तु निःस्पृहा हंसास्तीर्थयात्राप्रसङ्गतः ॥ ४ ॥ विश्व-

वन्द्याय गुरवे नमस्कृत्वाथ योगिनः ॥ स्वेच्छया निर्गताः सर्वे मनोभिलषितं यथा ॥ ५ ॥ ततः स्वस्थमना भूत्वा योगध्यानपरोऽभवत् ॥ तस्मिन्सहस्रलिङ्गाख्ये शाल्मलीतीररसंस्थिते ॥ ६ ॥ अध्युवास चिरं तत्र स्नानानुष्ठानपूजनैः ॥ विद्यायाः संप्रदायज्ञं शिष्यं विन्यस्य कोविदम् ॥ ७ ॥ स्वयं जगाम सायुज्यं ब्रह्मणस्तमसःपरम् ॥ स शिष्यः परमोदारो विश्वनाथसरस्वतिः ॥ ८ ॥ शिष्यानध्यापयामास वेदशास्त्राणि सर्वदा ॥ कदाचिद्दस्यवो दूरात् पररा ष्ट्रात्समागताः ॥ ९ ॥ समंततो मठस्यास्य चक्रुर्बाधां जुगुप्सिताम् ॥ राज्ञे निवेदयामासु श्चोरकृत्यं सुदुःसहम् ॥ १० ॥ राजापि चिन्तयामास किंकरोमीति चाब्रवीत् ॥ शूरा गच्छन्तु वेगेन दुर्गान्तर्वनपर्वतान् ॥ ११ ॥ धृत्वा तान्रज्जुभिर्बद्धानानयन्तु ममाग्रतः ॥ सदाशिवमहीपालस्तुरगैर्वहुभिर्वृतः ॥ १२ ॥ गिरिगह्वरदेशेषु चचार च दिनत्रयम् ॥ आगत्य स्वगृहं राजा स्नात्वा कृत्वा द्विजेरितान् ॥ १३ ॥ आगमोक्तेन मार्गेण तन्त्रान् सर्वान् चकार सः ॥ भुक्त्वा स्थानं समासाद्य मन्त्रिणां बुद्धिशालिनां ॥ १४ ॥ चोराणां कथयामास नाशनं मूलतो नृपः ॥ आलोच्य मन्त्रिभिः

सार्धं सदाशिवमहीपतिः ॥ १५ ॥ आगत्य मन्त्रिणा सार्धं महत्या सेनया वृतः ॥ सहस्रलिङ्गे शाल्मल्यास्तीरे ध्यानपरायणम् ॥ १६ ॥ विश्वनाथगुरुं दृष्ट्वा ववन्दे दण्डवन्मुनिम् ॥ पृष्टं तु कुशलं तस्य प्राह गम्भीरया गिरा ॥ १७ ॥ अपृच्छदादितः सर्वं कथयामास पार्थिवः ॥ अद्यप्रभृति भोः स्वामिन् रक्षकाश्च शतद्वयम् ॥ १८ ॥ मठस्य द्वारमश्नितः श्चोरक्षयविधायकाः ॥ तिष्ठन्तु शूराः शतशो मठेष्वन्येषु वै शतम् ॥ १९ ॥ इति संभाष्य गुरुणा गृहीताज्ञस्तदा ययौ ॥ ततः प्रभृति यतिराट् विश्वनाथसरस्वती ॥ २० ॥ पालय-

न्शिष्यवर्गांश्च मानयन् शिक्षयन्नपि ॥ पण्डितैर्धर्मशास्त्रज्ञैः कविभिर्वेदपाठकैः ॥ २१ ॥ पुराणवक्तृभिर्वैद्यैचारयाचकसेवकैः ॥ वाह्यैर्भृत्यजनैरन्यैर्नानादेशसमागतैः ॥ २२ ॥ पंग्वंधबधिरस्तब्धसरोगानाथदुःखिभिः ॥ शिष्येण वेदिना मार्गं यतिधर्मस्य धीमता ॥ २३ ॥ पठता सर्वशास्त्राणि कार्याकार्ये विचिन्वता ॥ पुरोहितार्चकाभ्यां च गणकैश्च विचारिभिः ॥ २४ ॥ एतैःसमन्वितो ज्ञानी वभासे हरिसेवया ॥ तदन्वये समुत्पन्नः प्रत्यग्ब्रह्मसरस्वती ॥ २५ ॥ चकार गुरुवत्सर्वमुपायैर्वेदसङ्ख्यकैः ॥ पूर्वभूताश्च यतयो

यथा चेरुस्तथाधुना ॥ २६ ॥ विधाय वर्णिनं शिष्यं संन्यासेन च कर्मणा ॥ सोऽपि सिद्धिं परां लेभे विश्वनाथसरस्वती ॥ २७ ॥ मुमुक्षवो गताः सिद्धिं यतयो ज्ञानिनोऽमलाः ॥ वेदान्तमार्गनिपुणाः पूर्वमासन् यतीश्वराः ॥ २८ ॥ संप्रदाये सरस्वत्याः शाल्मलीतीरवासिनः ॥ त्रिंशत्सप्ताधिका ह्यासीत्सन्ततिःप्रथिता भुवि ॥ २९ ॥ तत्कुलाज्जात्समुद्भूतो गङ्गाधरयतीश्वरः ॥ सर्वानाक्रम्य बुद्ध्यास्ते तद्गुणाधिगुणोऽभवत् ॥ ३० ॥ पदवाक्यप्रमाणज्ञः समदृष्टिः प्रकाशते ॥ आसेतुहिमवच्छैलं कीर्तिस्तेन वितन्यते ॥ ३१ ॥

॥ ३१ ॥

एतादृशः पुरा नासीत्संभविष्यति नो पुरः ॥ तस्मात्तं मनसा वाचा कायेनाहं नमेऽन्वहम् ॥ ३२ ॥ प्रकाशस्तारकब्रह्म स्वप्रकाशसरस्वतेः ॥ बृहद्गङ्गाधरयतेर्वादः काश्यामभूत्किल ॥ ३३ ॥ स्वाराज्यसिद्धिनामानं ग्रन्थं चक्रे जिगीषया ॥ ग्रन्थेन तेन भग्नोऽभूत्स्वप्रकाशो यतीश्वरः ॥ ३४ ॥ एतद्व्याप्तं जगत्सर्वं विद्यात्यागतपोबलैः ॥ सर्वज्ञ उवाच ॥ इत्येते गुरवोऽस्माकं पृच्छतां वोऽन्ववादिषं ॥ ३५ ॥ इत्याकर्ण्य वचस्तस्य सर्वज्ञेन्द्रसरस्वतेः ॥ ॥ शिष्या ऊचुः ॥ धन्याःस्मः कृतकृत्याःस्मः सर्वज्ञेन्द्रसरस्वते ॥ ३६ ॥ यदि

चेत्संशयोस्माकं पुनस्त्वं छेत्तुमर्हसि ॥ इत्युक्त्वा ते प्रशंसन्तो निर्ययुर्गुरुमात्मनः ॥ ३७ ॥ सर्वज्ञ उवाच ॥ अविमुक्ते पुरा शिष्या यतयो ब्रह्मवादिनः ॥ नानादेशात्समागत्य मिलित्वा स्पर्धिनोऽभवन् ॥ ३८ ॥ वयं ज्येष्ठा वयं श्रेष्ठाः संप्रदायप्रवर्त्तिनः ॥ एवमन्योन्यसंवादः प्रत्यहं समपद्यत ॥ ३९ ॥ एकत्र मिलिताः सर्वे तीर्थस्नानप्रसङ्गतः ॥ महान्तो योगिनो निष्ठा विद्वांसो वीतकल्मषाः ॥ ४० ॥ निश्चित्य प्रोचिरे स्वं स्वं संप्रदायं पृथक् पृथक् ॥ भास्करेन्द्रसरस्वत्या मूलभूताद्यतीश्वरात् ॥ ४१ ॥ विश्वनाथेन्द्रपर्यन्तं संप्र-

दायं च सन्ततिम् ॥ शिष्यान्प्रशिष्यांस्तच्छिष्यान् जगाद ग्रन्थतो यतिः ॥ ४२ ॥ संप्रदायाश्रमाचारैर्विद्याज्ञानतपोबलैः ॥ ज्येष्ठो बभूव सर्वेषां गङ्गाधरसरस्वती ॥ ४३ ॥ तेनोक्तां मूलतोज्ञानदीपिकामपवर्गदाम् ॥ तामेव कथितां प्राज्ञा गुरोः प्राप्तां परंपराम् ॥ ४४ ॥ आकर्ण्य हृदये कृत्वा प्रणम्य गुरुमा स्तिकम् ॥ आज्ञां गृहीत्वा निर्याताः स्वाश्रमान्प्रतिपेदिरे ॥ ४५ ॥ शिष्यानाश्वास्य मधुरैर्गुरुमूलकथामृतैः ॥ स्वस्याश्रमपदं गत्वा सर्वज्ञेन्द्रसरस्वती ॥ ४६ ॥ ब्रह्मसायुज्यं साम्राज्यं लेभे कालवशाच्चिरम् ॥ तच्छिष्यो रामचन्द्राख्यो

सर्वानाक्रम्य तस्थिवान् ॥ ४७ ॥ अधीत्य सर्वशास्त्राणि वेदान्तार्दीनि कृत्स्नशः ॥ ज्ञानिनां प्रवरो भूत्वा बभासे तपसा त्विषा ॥ ४८ ॥ सर्वज्ञेन्द्रसरस्वतीगुणगणप्रत्युज्ज्वलन्तुना काश्यां विन्ध्यगिरावन्तिनगरे गोकर्णसौधे पुरे ॥ मुक्तैर्मौक्तिकहेमरत्नसदृशैर्बद्धां च ये मालिकां कंठे बिभ्रति साधवो यतिवरास्ते यान्ति विष्णोःपदम् ॥४९॥ पूर्वं मस्करिणामनन्यमनसां ज्ञानाय यान् बोधितान् काश्यां शङ्करभास्करादवगतान् सत्संप्रदायाश्रमान्॥ प्रोचे संततिमात्मनो यतिवरो गङ्गाधरेन्द्रो महान् तान्येभ्यो निजगाद सन्ततिम-

सौ तेभ्यो यतिभ्यो नमः ॥ ५० ॥ शृण्वन्ति गायन्ति पठन्ति सन्तः खेलन्ति मोदन्ति नमन्ति चेमाम् ॥ ये ज्ञानदीपां गुरुराजसंततिं ते यान्ति सर्वे पदमच्युतस्य ॥ ५१ ॥ य इमं पठते नित्यं सर्वान्कामानवाप्नुयात् ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ ५२ ॥ पुत्रार्थी लभते पुत्रान् मोक्षार्थी मोक्षमाप्नुयात् ॥ कन्यार्थी लभते कन्यां स चिरं मोदते क्षितौ॥ इत्येतद्गुरुमाहात्म्यं श्रूयते पठ्यते कलौ ॥५३॥ कलिदोषैर्न बाध्येत प्रेत्य स्वर्गे महीयते ॥ भुक्त्वा भोगानलेकांश्च मृतःस्वर्गमवाप्नुयात ॥ ५४ ॥ इति श्रीम-

परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणविद्वद्गंगाधरस्वतिना विरचितायां ज्ञानदीपिकायां पञ्चमोऽध्यायः ॥ ५ ॥

इयं ज्ञानदीपिका तत्त्वविवेचकमुद्रणयंत्रालये मुद्रिता
शकाब्दाः १८१३.

॥ इति ज्ञानदीपिका समाप्ता ॥

END

END

END